# NCERT Solutions Class 8 Sanskrit (Deepakam)

## Chapter 13 वर्णोच्चारण-शिक्षा १

**अभ्यासात् जायते सिद्धिः (पृष्ठ 155–158)**

**१. अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन द्विपदेन वा उत्तरत-**

**(क) उरसि किं तन्त्रं भवति ? ________________**

**उत्तराणि :** वायु-बल-तन्त्रम्

**(ख) नाभिप्रदेशे स्थिताः मांसपेश्यः किं नोदयन्ति ? ________________**

**उत्तराणि :** उरः

**(ग) आस्यस्य आभ्यन्तरे वार्णानाम् उत्पत्त्यर्थं द्वितीयं तत्त्वं किम् अस्ति ? ________________**

**उत्तराणि :** करणम्

**(घ) आस्ये कति स्थानानि सन्ति? ________________**

**उत्तराणि :** षट्

**(ङ) स्थानस्य कार्यनिदर्शनार्थं किं समुचितम् उदाहरणम् अस्ति ? ________________**

**उत्तराणि :** 'मुरली'

**(च) करणानि मुरल्याः कस्य भागम् इव व्यवहरन्ति ? ________________**

**उत्तराणि :** आस्यस्य स्थानानि

**२. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत-**

**(क) करणं किं भवति ?**

**उत्तराणि :** वर्णस्य उच्चारण-समये, आस्यस्य यः भागः स्थानं स्पृशति, स्थानस्य समीपं वा याति, सः भागः–'करणम्' इति कथ्यते।

**(ख) उरः श्वासकोशस्थितं वायुं कुत्र निःसारयति ?**

**उत्तराणि :** उरः श्वासकोशस्थितं वायुम् ऊर्ध्वं निःसारयति।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ग) मुरल्याः अङ्गुलिच्छिद्राणि कीदृशं व्यवहरन्ति ?**
**उत्तराणि :** मुरल्याः अङ्गुलिच्छिद्राणि आस्यस्य स्थानानि इव व्यवहरन्ति ।

**(घ) केषां वार्णानाम् उच्चारणे जिह्वा प्रायः निष्क्रिया भवति ?**
**उत्तराणि :** कण्ठ्यानाम्, ओष्ठ्यानां नासिक्यानां च वर्णानाम् उच्चारणे जिह्वा निष्क्रिया भवति।

**(ङ) तालव्यानां, मूर्धन्यानां दन्त्यानां च वर्णानाम् उच्चारणार्थं सामान्यं करणं किम् अस्ति ?**
**उत्तराणि :** तालव्यानां, मूर्धन्यानां दन्त्यानां च वर्णानाम् उच्चारणार्थं सामान्यं करणं जिह्वा करणं अस्ति ।

**(च) कण्ठ्यानां, ओष्ठ्यानां नासिक्यानां च वर्णानाम् उच्चारणार्थं स्थानस्य करणस्य च मध्ये किं भवति?**
**उत्तराणि :** कण्ठ्यानां, ओष्ठ्यानां नासिक्यानां च वर्णानाम् उच्चारणार्थं स्थानस्य करणस्य च मध्ये 'स्वस्थानं' भवति ।

**३. अधोलिखितेषु वाक्येषु आम् / न इति लिखित्वा उचितभावं सूचयत-**

**(क) श्वासकोशस्थितः वायुः ऊर्ध्वं चरन् पूर्वम् आस्यं प्राप्नोति ।**
**उत्तराणि :** न।
उचितभावं-सः वायुः ऊर्ध्वं चरन् पूर्वम् कण्ठ- बिलं प्राप्नोति ।

**(ख) सर्वप्रथमं नाभि – प्रदेशे स्थिताः मांसपेश्याः कण्ठं नोदयन्ति।**
**उत्तराणि :** न।
उचितभावं सर्वप्रथमम् नाभि-प्रदेशे स्थिताः मांसपेश्याः उरः नोदयन्ति ।

**(ग) आस्यस्य आभ्यन्तरे वर्णानाम् उत्पत्त्यर्थम् आभ्यन्तर-प्रयत्नः आवश्यकम् अस्ति ।**
**उत्तराणि :** आम्।
उचितभावं- आस्यस्य आभ्यन्तरे वर्णानाम् उत्पत्त्यर्थम् वस्तुतः त्रीणि तत्वानि आवश्यकानि भवन्ति – स्थानम्, करणम् आभ्यन्तर-प्रयत्नः च।

**(घ) तालव्य-वर्णनाम् उच्चारणार्थं दन्तः स्थानं स्पृशति ।**
**उत्तराणि :** न।
उचितभावं-तालव्य-वर्णानाम् उच्चारणार्थं जिह्वा स्थानं स्पृशति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ङ) मूर्धन्यानां वर्णानाम् उच्चारणार्थं जिह्वा स्थानं स्पृशति।**

**उत्तराणि :** आम्।

उचितभावं – मूर्धन्यानां वर्णानाम् उच्चारणार्थं जिह्वा स्थानं स्पृशति।

**(च) तत्तत्स्थानस्य एव कश्चित् पूर्वभागः, तत्तत्स्थानस्य परभागं स्पृशति ।**

**उत्तराणि :** न।

उचितभावं-तत्-तत्-स्थानस्य एव कश्चित् परभागः, तत्-तत् स्थानस्य पूर्व-भागं स्पृशति, समीपं वा याति ।

**४. मुखे उपलभ्यमानानि स्थानानि बहिष्ठात् अन्तः यथाक्रमं (अर्थात् विपरीत क्रमेण) लिखन्तु-**




**उत्तराणि :** (ङ) ओष्ठः

(ख) दन्तः

(ग) तालु

(क) मूर्धा

(घ) कण्ठः

**५. यथायोग्यं मेलनं कुरुत-**

| सामान्य-स्थानम् | विशेष-स्थानम् | सामान्य-करणम् | विशेष-करणम् |
|---|---|---|---|
| ओष्ठः | मूर्धा | स्वस्थानं करणम् | अधरोष्ठः |
| दन्ताः | नासिकामूलस्य उपरिभागः | जिह्वा करणम् | जिह्वाग्रः |
| नासिका | तालु | स्वस्थानं करणम् | जिह्वामध्यः |
| कण्ठः | उत्तरोष्ठः | जिह्वा करणम् | कण्ठस्य अग्रभागः |
| मूर्धा | दन्ताः | स्वस्थानं करणम् | नासिकामूलस्य अधोभागः |
| तालु | कण्ठस्य पृष्ठभागः | जिह्वा करणम् | जिह्वोपाग्रः |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तराणि :**

| **सामान्य- स्थानम्** | **विशेष- स्थानम्** | **सामान्य- करणम्** | **विशेष-करणम्** |
|---|---|---|---|
| ओष्ठः | उत्तरोष्ठः | स्वस्थानं करणम् | अधरोष्ठः |
| दन्तः | दन्तः | जिह्वा करणम् | जिह्वोपाग्र: |
| नासिका | नासिकामूलस्य उपरिभागः | स्वस्थानं करणम् | कण्ठस्य अग्र |
| कण्ठः | कण्ठस्य पृष्ठभाग: | जिह्वा करणम् | जिह्वामध्य: |
| मूर्धा | मूर्धा | स्वस्थानं करणम् | नासिकामूलस्य अधोभागः |
| तालु | तालु | जिह्वा करणम् | जिह्वाग्र: |


Get More Learning Materials Here : CLICK HERE www.studentbro.in

## योग्यताविस्तारः

पाणिनीय-शिक्षा-सूत्राणि-

षष्ठ-कक्षायां 'स्थान-प्रकरणस्य' सूत्राणि दृष्टवन्तः। अधुना 'करण-प्रकरणस्य' सूत्राणि –

| सूत्राणि | अर्थाः |
|---|---|
| करण–प्रकरणम् | |
| करणम् अपि। | अधुना (वर्णोच्चारणस्य) 'करणं' जानीमः। |
| तालव्य-मूर्धन्य-दन्त्यानां – जिह्वा करणम्। | तालव्यानां मूर्धन्यानां दन्त्यानां च वर्णानाम् उच्चारणे → 'जिह्वा' करणं भवति। |
| जिह्वामध्येन – तालव्यानाम्। | तालव्य-वर्णानाम् उच्चारणे → जिह्वायाः 'मध्य-भागः' करणं भवति। |
| जिह्वोपाग्रेण – मूर्धन्यानाम्। | मूर्धन्य-वर्णानाम् उच्चारणे → जिह्वायाः 'उपाग्र-भागः' करणं भवति। |
| जिह्वाग्रेण – दन्त्यानाम्। | दन्त्य-वर्णानाम् उच्चारणे → जिह्वायाः 'अग्र-भागः' करणं भवति। |
| शेषाः – स्वस्थानकरणाः। | शेषाणां (कण्ठ्य-ओष्ठ्य-नासिक्यानां) वर्णानाम् उच्चारणे → 'स्वस्थानं' (स्वस्य स्थानस्य कश्चिद् भागविशेषः) एव → करणं भवति। |
| इत्येतत् करणम्। | अत्र पर्यन्तम् एतत् उच्चारणस्य 'करणं' चर्चितम्। |




Get More Learning Materials Here : CLICK HERE www.studentbro.in

**अत्र इदम् अवधेयम्**

**'स्वरः' इत्यस्य परिभाषा-वाक्यम्-स्वयं राजन्ते इति स्वराः ।**

**अर्थः-** ये वर्णाः (स्वयं) स्वतन्त्ररूपेण (राजन्ते ) उच्चार्यन्ते,

ते → स्वराः भवन्ति

**'व्यञ्जनम्' इत्यस्य परिभाषा-वाक्यम्- अन्वग् भवति व्यञ्जनम्।**

**अर्थः**- उच्चारणार्थं यः वर्णः अचं (स्वर) प्रति पराश्रितः भवति, सः वर्णः → 'व्यञ्जनं' भवति ।

**उत्तराणि –** यहाँ यह जानें

**परिभाषा-**

स्वर की परिभाषा-वाक्य-

जो स्वयं सुशोभित होते हैं, वे स्वर हैं।

अर्थ- जो वर्ण (स्वयं) स्वतंत्र रूप में (सुशोभित) उच्चरित होते हैं वे → स्वर कहलाते हैं।

'व्यञ्जन' की परिभाषा – वाक्य

जो स्वरों के पीछे-पीछे चलते हैं, वे व्यंजन होते हैं। अर्थ- उच्चारण के लिए जो वर्ण स्वर पर निर्भर होता है, वह वर्ण → 'व्यंजन' कहलाता है।

Get More Learning Materials Here : CLICK HERE www.studentbro.in